श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि कृतिषु

# ॥ श्रीदेशिकपञ्चदशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीदेशिकपञ्चदशी ॥

श्रीवाजिवक्त्रकरुणापरिरम्भिताय
    श्रीवत्स्यदेशिककटाक्षविवर्धिताय।
श्रीवादिहंसजलदार्यसमीक्षिताय
    श्रीवादिवारणमृगेन्द्रगुरो! नमस्ते॥ १ ॥

श्रुतिद्वयशिरोगुरुप्रथितपङ्क्तिसंसेवितं
    श्रुतिद्वयशिरोगुरुं भज भवेत् सती ते गतिः।
श्रुतिद्वयशिरोगिरां सरसभावसंसेवनं
    श्रुतिद्वयशिरोगतं सुभगभूषणं क्वान्यतः॥ २ ॥

मधु वाचि मधुद्विडन्तरङ्गे
    तव यद्देशिक! तत्त्वतीव चित्रम्।
मनसो वचसोऽपि चैकरूप्यं
    महतां भूषणमामनन्ति सन्तः॥ ३ ॥

चक्षुः श्रुतेरुपरि सन्ततमात्तलीलं
    चक्षुः श्रुतेरिति भजन्निह रङ्गनाथम्।
चक्षुः श्रुतेरवगतेः गुरुरान्तरं नः
    चक्षुर्युगं श्रुतियुगं सफलं विधत्ताम्॥ ४ ॥

रङ्गं निवासेन विभूषयन्तं
    रङ्गं परं स्वैर्वचसां विलासैः।
अङ्गं च पुण्ड्रैरभिरामभूतैः
    तुङ्गं गुरुं कञ्चिदुपाश्रयामः॥ ५ ॥

विषादथाग्नेरथवाऽभिचारात्
    विषाददायाश्च सदाऽज्ञतायाः।

भियं विहन्तुं कुशलं च गन्तुं
धियं गुरोरस्य पदे कुरुध्वम्॥ ६॥

सुहृत्सुपर्णस्य सुदर्शनस्य
सुपर्ववृक्षस्य हयाननस्य।
श्रियो विभुत्वस्य नतेर्विधाता
यतोऽयमास्ते गुरुसार्वभौमः॥ ७॥

वल्मीकसम्भवमुनेरपि माननीयं
मन्ये भवन्तमवनौ कविसार्वभौमम्।
जन्माऽभजत् किल स भूः श्रवणे भवांस्तु
जन्माऽभजत् पुनरथ श्रवणे नभस्ये॥ ८॥

द्वैपायनो मुनिवरस्स भवानपीह
कन्याभवौ निगममूर्ध्न्यमातताना।
सूत्रावलिं किल भवानथ सारपङ्क्तिं
मुक्ताकलापसहितामिति नाम भेदः॥ ९॥

अनेकदुर्वाद्यजतोऽभिरक्षन्
अस्मन्मतं सस्यमतीव भोग्यम्।
अनन्तसूरेरयमात्मजोऽस्मान्
अनन्तसन्तोषनिधीन् वितेने॥ १०॥

कृपासरित्स्रोतसि तावकीने
कृताप्लवो देशिक! यस्तु जन्तुः।
कृती स चित्रं निजतेजसाऽत्र
कृपीडयोनेरपि भाति जेता॥ ११॥

सर्वात्मसंरक्षणजागरूक
गुर्वात्मना वेङ्कटनाथघण्टा।
सर्वंसहायां सहसावतीर्णा
दुर्वादिशब्दान् तिरयाञ्चकार॥ १२॥



www.prapatti.com

तत्त्वत्रयस्यापि मतत्रयस्य
    दैवत्रयस्यापि मुनित्रयस्य।
श्रुतित्रयस्यापि रसं विवेक्तुः
    लोकत्रयं धारयते महस्ते॥ १३ ॥

एको भवान् हयमुखेन तु सद्वितीयः
    त्रय्यन्तदेशिकमणे! चतुरः पुमर्थान्।
पञ्चापि कल्पकतरून् वितरन् विजित्य
    योगं षडङ्गसहितं भुवने व्यतारीत्॥ १४ ॥

केन प्रीतिमुपैति विष्णुरनघो दत्तेन निष्कल्मषं
    तन्नेत्राकृति किं स कस्य तु तरोः शेते पलाशे विभुः।
कीदृक्षः श्रुतिषु श्रुतः सह सुरैस्तेने स किं क्षीरधौ
    यः प्रश्नोत्तरमध्यवर्णघटितस्तस्मै नमस्कुर्महे॥ १५ ॥

देवं परं तं च सदा भजन्तं
    शिखां च वेदस्य परामृशन्तम्।
कविं महान्तं तमिमं विलोक्य
    स्थाने बुधा देशिक इत्युशन्ति॥ १६ ॥

श्रीमद्देशिकपञ्चदशाख्या श्रीमत्याश्रितकल्पकवीरुत्।
श्रीमद्देशिकवीक्षाभाजा श्रीनिधिकविना कलिता जयति॥ १७ ॥

॥ इति श्रीदेशिकपञ्चदशी स्तोत्रं समाप्तम्॥

www.prapatti.com